# shrI sarasvatyaShTottarashatanAma stotram

# શ્રીસરસ્વત્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : sarasvatyaShTottara shatanAma stotram

File name : sarasvati108St.itx

Category : aShTottarashatanAma, devii, sarasvatI, stotra, devI

Location : doc_devii

Author : Traditional

Proofread by : Sunder Hattangadi

Latest update : March 30, 2002, March 5, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

shrI sarasvatyaShTottarashatanAma stotram

# શ્રીસરસ્વત્યષ્ટોત્તરશતનામસ્તોત્રમ્

સરસ્વતી મહાભદ્રા મહામાયા વરપ્રદા ।
શ્રીપ્રદા પદ્મનિલયા પદ્માક્ષી પદ્મવક્ત્રકા ॥ ૧॥

શિવાનુજા પુસ્તકભૃત્ જ્ઞાનમુદ્રા રમા પરા ।
કામરૂપા મહાવિદ્યા મહાપાતકનાશિની ॥ ૨॥

મહાશ્રયા માલિની ચ મહાભોગા મહાભુજા ।
મહાભાગા મહોત્સાહા દિવ્યાઙ્ગા સુરવન્દિતા ॥ ૩॥

મહાકાલી મહાપાશા મહાકારા મહાઙ્કુશા ।
પીતા ચ વિમલા વિશ્વા વિદ્યુન્માલા ચ વૈષ્ણવી ॥ ૪॥

ચન્દ્રિકા ચન્દ્રવદના ચન્દ્રલેખાવિભૂષિતા ।
સાવિત્રી સુરસા દેવી દિવ્યાલઙ્કારભૂષિતા ॥ ૫॥

વાગ્દેવી વસુધા તીવ્રા મહાભદ્રા મહાબલા ।
ભોગદા ભારતી ભામા ગોવિન્દા ગોમતી શિવા ॥ ૬॥

જટિલા વિન્ધ્યવાસા ચ વિન્ધ્યાચલવિરાજિતા ।
ચણ્ડિકા વૈષ્ણવી બ્રાહ્મી બ્રહ્મજ્ઞાનૈકસાધના ॥ ૭॥

સૌદામિની સુધામૂર્તિસ્સુભદ્રા સુરપૂજિતા ।
સુવાસિની સુનાસા ચ વિનિદ્રા પદ્મલોચના ॥ ૮॥

વિદ્યારૂપા વિશાલાક્ષી બ્રહ્મજાયા મહાફલા ।
ત્રયીમૂર્તિઃ ત્રિકાલજ્ઞા ત્રિગુણા શાસ્ત્રરૂપિણી ॥ ૯॥

શુમ્ભાસુરપ્રમથિની શુભદા ચ સ્વરાત્મિકા ।
રક્તબીજનિહંત્રી ચ ચામુણ્ડા ચામ્બિકા તથા ॥ ૧૦॥

મુણ્ડકાયપ્રહરણા ધૂમ્રલોચનમર્દના ।
સર્વદેવસ્તુતા સૌમ્યા સુરાસુરનમસ્કૃતા ॥ ૧૧॥

કાલરાત્રી કલાધારા રૂપસૌભાગ્યદાયિની ।
વાગ્દેવી ચ વરારોહા વારાહી વારિજાસના ॥ ૧૨॥

ચિત્રામ્બરા ચિત્રગન્ધા ચિત્રમાલ્યવિભૂષિતા ।
કાન્તા કામપ્રદા વન્દ્યા વિદ્યાધરસુપૂજિતા ॥ ૧૩॥ વિદ્યાધરી સુપૂજિતા

શ્વેતાનના નીલભુજા ચતુર્વર્ગફલપ્રદા ।
ચતુરાનનસામ્રાજ્યા રક્તમધ્યા નિરઞ્જના ॥ ૧૪॥

હંસાસના નીલજઙ્ઘા બ્રહ્મવિષ્ણુશિવાત્મિકા ।
એવં સરસ્વતીદેવ્યા નામ્નામષ્ટોત્તરં શતમ્ ॥ ૧૫॥

ઇતિ શ્રી સરસ્વત્યષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

---

*shrI sarasvatyaShTottarashatanAma stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*